श्री गायत्री शापोद्धार स्तोत्रं

श्री गायत्री शापोद्धार स्तोत्रं

शापमुक्ता हि गायत्री चतुर्वर्गफलप्रदा |
अशापमुक्ता गायत्री चतुर्वर्गफलांतका ||

ॐ अस्य श्रीब्रह्मशापविमोचनमंत्रस्य निग्रहानुग्रहकर्ता
प्रजापतिर्ऋषिः अथवा ब्रह्मा ऋषिः | कामदुघा गायत्री छंदः |
भुक्तिमुक्तिप्रदा ब्रह्मशापविमोचनी गायत्रीशक्तिर्देवता |
ब्रह्मशापविमोचनार्थे जपे विनियोगः ||

ॐ गायत्रीं ब्रह्मेत्युपासीत यद्रूपं ब्रह्मविदो विदुः |
तां पश्यंति धीराः सुमनसो वाचमग्रतः |
ॐ वेदांतनाथाय विद्महे हिरण्यगर्भाय धीमही तन्नो ब्रह्म प्रचोदयात् |
ॐ देवि गायत्री त्वं ब्रह्म शापात् विमुक्ता भव ||

ॐ अस्य श्रीवसिष्ठशापविमोचनमंत्रस्य
निग्रहानुग्रहकर्ता वसिष्ठऋषिः |
विश्वोद्भवा गायत्री छंदः |
वसिष्ठानुग्रहिता गायत्रीशक्ति देवताः |
वसिष्ठ शाप विमोचनार्थं जपे विनियोगः ||

तत्त्वानि चांगेष्वग्निचितो धियांसः ध्यायति विष्णोरायुधानि बिभ्रत् |
जनानता सा परमा च शश्वत् | गायत्रीमासाच्छुरनुत्तम च धाम
ॐ गायत्रीवसिष्ठशापाद्विमुक्ता भव |

ॐ सोऽहमर्कमयं ज्योतिरात्मज्योतिरहं शिवः |
आत्मज्योतिरहं शुक्रः सर्वज्योतिरसोऽस्म्यहं ||
(इति युक्त्व योनि मुद्रां प्रदर्श्य गायत्री त्रयं पदित्व)
(योनि मुद्रा दिखाकर 3-तीन बार गायत्री मंत्र का जाप करे |)
ॐ देवी गायत्री त्वं वसिष्ठ शापात् विमुक्ता भव ||

ॐ अस्य श्रीविश्वामित्रशापविमोचनमंत्रस्य
नूतनसृष्टिकर्ता विश्वामित्रऋषिः |
वाग्दोहा गायत्री छंदः |
विश्वामित्रानुगृहिता गायत्री शक्तिः सविता देवता |
विश्वामित्रशापविमोचनार्थे जपे विनियोगः ||

तत्त्वानि चांगेष्वग्निचितो धियांसस्त्रिगर्भां यदुद्भवां
देवाश्चोचिरे विश्वसृष्टिं | तां कल्याणीमिष्टकरीं
प्रपद्ये यन्मुखान्निःसृतो वेदगर्भः ||

ॐ गायत्रि त्वं विश्वामित्रशापाद्विमुक्ता भव ||

ॐ गायत्रीं भजाम्यग्निमुखीं विश्वगर्भां यदुद्भवाः |
देवाश्चक्रिरे विश्वसृष्टिं तां कल्याणीमिष्टकरीं प्रपद्ये ||
ॐ देवी गायत्री त्वं विश्वामित्र शापात् विमुक्ता भव ||

ॐ अस्य श्रीशुक्रशापविमोचनमंत्रस्य श्रीशुक्र ऋषिः |
अनुष्टुप्छंदः | देवि गायत्री देवताः |
शुक्र शाप विमोचनार्थं जपे विनियोगः ||

सोऽहमर्कमयं ज्योतिरर्कज्योतिरहं शिवः |
आत्मज्योतिरहं शुक्रः सर्वज्योतिरसोऽस्म्यहं ||

ॐ देवी गायत्री त्वं शुक्र शापात् विमुक्ता भव ||

प्रार्थना |
ॐ अहो देवि महादेवि संध्ये विद्ये सरस्वती |
अजरे अमरे चैव ब्रह्मयोनिर्नमोऽस्तुते ||

ॐ देवी गायत्री त्वं ब्रह्मशापात् विमुक्ता भव |
वसिष्ठशापात् विमुक्ता भव |
विश्वामित्रशापात् विमुक्ता भव |
शुक्रशापात् विमुक्ता भव ||